पुष्टिकरी स्मृता। एवमन्योऽपि वेशनभवाः प्रकाराः खण्डनखण्डप्रभृतयो बोद्धव्याः।

अथ मांसस्य प्रकाराः। तत्र शुद्धमांसम्। (सुधमांस) इति लोके। पाकपात्रे घृतं दद्यात् तैलञ्च तदभावतः। तत्र हिङ्गु हरिद्रां च भर्जयेत्तदनन्तरम्। छागादेरस्थिरहितं मांसं तत्खण्डितं ध्रुवम्। धौतं निर्गालितं तस्मिन् घृते तद्भर्जयेच्छनैः। सिद्धियोग्यं जलं दत्त्वा लवणन्तु पचेत्ततः। सिद्धे जलेन सम्पिष्य वेशवारं परिक्षिपेत्। वेशवारः (वेशम) इति लोके। द्रव्याणि वेशवारस्य नागवल्लीदलानि च। तण्डुलाश्च लवङ्गानि मरीचानि समांसतः। अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम्। शुद्धमांसं परं हृद्यं बल्यं रुच्यञ्च बृंहणम्। त्रिदोषशमनं श्रेष्ठं दीपनं धातुवर्द्धनात्।

अथ सहार्द्रकम् (सहरमांस) इति लोके। छागादेर्मांसमूर्वादेः कुट्टितं खण्डितं पुनः। शुद्धमांसविधानेन पचेदेतत्सहार्द्रकम्। सहार्द्रकं गुणाद्यन्यो शुद्धमांसगुणं स्मृतम्।

अथ तक्रमांसम् (अखनी) पाकपात्रे घृतं दत्त्वा हरिद्रा हिङ्गु भर्जयेत्। छागादेः सकलस्यापि खण्डान्यपि च भर्जयेत्। सिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा। जीरकादियुते तक्रे मांसखण्डानि तारयेत्। तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदम्। कफघ्नं पित्तलं किञ्चित् सर्वाहारस्य पाचनम्।

अथ हरीसा (आस)। पाकपात्रे तु इहति मांसखण्डानि निःक्षिपेत्। पानीयं प्रचुरं सर्पिः प्रभूतं हिङ्गु जीरकम्। हरिद्रामार्द्रकं शुण्ठीं लवणं मरिचानि च। तण्डुलांश्चापि गोधूमां जम्बीराणां रसान् बहून्। यथा सर्वाणि वस्तूनि सुपक्वानि भवन्ति हि। तथा पचेत् तु निपुणो बहुमांसस्थितिर्यथा। एषा हरीसा बलकृत् वातपित्तापहा गुरुः। शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी।

तलितमांसम्। शुद्धमांसविधानेन मांसं सम्यक्प्रसाधितम्। पुनस्तदाज्ये सम्भृष्टं तलितं प्रोच्यते बुधैः। तलितं बलमेधाग्निमांसौजःशुक्रवृद्धिकृत्। तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम्।

अथ शूल्यम् (सीख) कालखण्डादिमांसानि ग्रथितानि शलाकया। तैलं सलवणं दत्त्वा निर्धूमे दहने पचेत्। तत् शूल्यमिदं प्रोक्तं पाककर्मविचक्षणैः। शूल्यं पलं सुधातुल्यं रुच्यं वह्निकरं लघु। कफवातहरं बल्यं किञ्चित्पित्तकरं हि तत्। (इदमेव शूलाकृतं भट्टित्रमित्युच्यते)

मांसशृङ्गाटिकम्। सिद्धमांसं तनूकृत्य कर्त्तितं स्वेदितं जले। लवङ्गहिङ्गुलवणमरिचार्द्रकसंयुतम्। एलाजिरकधन्याकनिम्बूरससमन्वितम्। घृते सुगन्धे तद्भृष्टं मांसशृङ्गाटिकोच्यते। मांसशृङ्गाटकं रुच्यं बृंहणं बलकृद्गुरु। वातपित्तहरं हृद्यं कफघ्नं वीर्यवर्द्धनम्।

अथ मांसरसः। सिद्धमांसरसो रुच्यः श्रमश्वासक्षयापहः। प्रीणनो वातपित्तघ्नः क्षीणानामल्परेतसाम्। विश्लिष्टभग्नसन्धीनां कृशानां शुद्धिकाङ्क्षिणाम्। स्मृत्योजोबलहीनानां ज्वरक्षीणक्षतोरसाम्। शस्यते स्वरहीनानां दृष्ट्यायुःश्रवणार्थिनाम्। प्रकाराः कथिताः सन्ति बहवो मांससम्भवाः। ग्रन्थविस्तारभीतेस्ते मया नात्र प्रकीर्त्तिताः। (ते च सुश्रुतेक्तगुणकथानऽनुपदं वक्ष्यन्ते)

शाकपाकविधिः। हिङ्गु जीरयुते तैले क्षिपेच्छाकं सुखण्डितम्। लवणं चाम्लचूर्णादि सिद्धे हिङ्गूदकं क्षिपेत्। इत्येवं सर्वशाकानां साधनोऽभिहितो विधिः।

अथ मठकः (माठ) इति लोके। समितामर्द्दयेदन्यजलेनापि च सञ्चयेत्। तस्मात्तु वटिकां कृत्वा पचेत्सर्पिषि नीरसम्। एलालवङ्गकर्पूरमरीचाद्यैरलङ्कृते। मज्जयित्वा सितापाके ततस्तञ्च समुद्धरेत्। अयं प्रकारः संसिद्धो मठ इत्यभिधीयते। सञ्चयेत् मर्द्दयेत्। मठस्तु बृंहणो हृद्यो बल्यः सुमधुरो गुरुः। पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः। समिताः शर्करासर्पिर्निर्मिता अपरेऽपि ये। प्रकारा अमुना तुल्यास्तेऽपि चैतद्गुणाः स्मृताः।

अथ सम्पावः(पेराकी)पर्प्प्यः साज्यसमिता निर्मिता घृतभर्जिताः। कुट्टिताश्चालिताः शुद्धशर्कराभिर्विमर्द्दिताः। तत्र चूर्णं क्षिपेदेलालवङ्गमरिचानि च। नालिकेलं सकर्पूरञ्चारबीजान्यनेकधा। घृताक्तसमिता पुष्टरोटिका रचिता ततः। तदन्तः पूरणं तस्याः कुर्य्यान्मुद्रां दृढां सुधीः। सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जनः। प्रकारस्तैः प्रकारोऽयं सम्पाव इति कीर्त्तितः।

अथ कर्पूरनालिका। घृताढ्यया समितया लम्बं कृत्वा पुटं ततः। लवङ्गोल्वणकर्पूरयुतया सितयाऽन्वितम्। पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका। सम्पावसदृशी ज्ञेया गुणैः कर्पूरनालिका।

फेनिका (फेनी) समितायाा घृताढ्याया वर्त्तिं दीर्घां समाचरेत्। तास्तु सन्निहिता दीर्घाः पीठस्योपरि धारयेत्।